**श्रीसुरसरस्वतीसभा, शृङ्गेरी**

**द्वितीया परीक्षा (नूतनपुस्तकाधारिता)**

**दिनाङ्कः** – 29-01-2023 **अङ्काः** 100

**पूर्वाह्णः** - १०:००तः १२:३०पर्यन्तम् **समयः** – सार्धद्विहोराः

ಸೂಚನೆಗಳು : ೧. ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯುವ ಉತ್ತರಗಳು ದೇವನಾಗರೀ ಲಿಪಿಯಲ್ಲೇ ಇರಬೇಕು.

೨. ಪ್ರಶ್ನೆಗಳ ಕ್ರಮಾಂಕಗಳನ್ನು ತಪ್ಪದೇ ಬರೆಯಿರಿ.

Instructions: 1. Write the Samskrita answers in Devanaagari script only.

2. Write the question numbers correctly.

**1. एकवाक्येन संस्कृतेन उत्तरं लिखत । ( षण्णामेव )** 6

१. कावेर्याः उद्गमस्थानं कुत्र अस्ति ?

२. प्रजाः कथं पालनीयाः ?

३. तुलस्याः अन्यानि नामानि कानि ?

४. सविता कदा रक्तः भवति ?

५. नन्दी कुत्र विराजते ?

६. कदा गुरुपूर्णिमाम् आचरन्ति ?

७. महेशः गतवर्षे कुत्र अगच्छत् ?

८. उपमन्युः कुत्र अपतत् ?

**2. वाक्यद्वयेन वा त्रयेण वा संस्कृतेन उत्तरं लिखत। ( त्रयाणामेव )** 6

१. चन्द्रस्य कति कलाः सन्ति ? कदा कला न दृश्यते ?

२. दशरथः कुत्र राजा आसीत् ? तस्य वंशः कः ?

३. ध्रुवस्य पिता कः ? माता का ? विमाता का ? भ्राता च कः ?

४. पण्डितः पुत्रान् आहूय किमवदत् ?

५. नवरात्रमहोत्सवः कति दिनानि प्रचलति ? तस्य नामान्तराणि कानि ?

**3. विषयद्वयम् अधिकृत्य त्रीणि वाक्यानि संस्कृतेन लिखत।** 6

१. गौः २. श्रीकृष्णः ३. व्यासः

**4. श्लोकौ पूरयित्वा अर्थं कन्नडभाषया आङ्ग्लभाषया वा लिखत ।** 8

१. कर्ता ………… । ……………. समभागिनः ॥

२. सम्पूर्णकुम्भो ……। …………… बहुजल्पयन्ति ॥

5. **ससन्दर्भं संस्कृतभाषया विवृणुत ।** 6

१. "भोः कृष्ण ! भवान् मथुराम् आगच्छतु " ।

1. कः पाठः ? 2. कः अवदत् ? 3. कं प्रति अवदत् ?

२. **"अप्रियम् अपि सत्यं वदति " ।**

1. कः पाठः? 2. का अवदत् ? 3. कम् अवदत् ?

6. **लोकोक्तेः अर्थं कन्नडभाषया आङ्ग्लभाषया वा विवृणुत ।** (द्वयोः एव) 4

१. प्रियवादिनो न शत्रुः ।

२. यथा बीजं तथा अङ्कुरः ।

३. न पुष्पार्थी सिञ्चति शुष्कवृक्षम् ।

7. **संवत्सराणां नामानि** श्लोकरूपेण **लिखत ।** 4

१. प्लवङ्गः ……..। ……................….. नलः॥ २. बहुधान्यः ………..। ……........... व्ययः॥

8. **चतुर्थपदं लिखत ।** 3

१. उपमन्युः - धौम्यः :: रामः ..........

२. पठ् – पठितुम् :: लिख् ……….

३. सह - तृतीया :: बहिः ……….

9. **विजातीयपदं लिखत ।** 3

१. निकषा, उभयतः, पुरतः, परितः

२. मतीः, मती, मतिम्, मतीन्

३. पठामः, पठावः, पठथः, पठतः

10. **अन्यलिङ्गे परिवर्तयत ।** **( त्रीणि एव )** 3

१. राजा २. नगरम् ३. भगवान् ४. पिता

11. **अस् धातोः, कृ धातोः वा रूपाणि लोट्-लकारे पुरुषत्रये वचनत्रये च लिखत ।** 3

12. **रिक्तस्थानानि कोष्टकदत्तशब्दस्य उचितैः विभक्ति/पुरुष/रूपेण पूरयत ।** 3

१. ................ सह सीता वनं गच्छति । ( राम )

२. अहं छात्रः ........................ । (अस् - लट् )

३. कृष्णबलरामौ मथुराम् ……. । (गम् - लङ् )

**13. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत । (त्रीणि एव )** 3

१. सः *प्रातः* संस्कृतं पठति ।

२. गोः *चत्वारः* पदाः सन्ति ।

३. *गुरुकुले* छात्राः पाठान् पठन्ति ।

४. *सविता* रक्तः भवति ।

**14. एतेषां पर्यायपदानि लिखत ।** ( त्रयाणामेव ) 3

१. सिंहः २. मन्त्री ३. पुनः ४. पण्डितः

**15. एतेषां विरुद्धार्थकानि पदानि लिखत।**( त्रयाणामेव ) 3

१. छाया २. वामः ३. रात्रिः ४. गच्छति

**16. सन्धिं विभज्य सन्धिनाम लिखत। (त्रीणि एव )** 3

१. अन्वसरत् २. नेच्छामि ३. अधुनापि ४. तत्रैव

17. सन्धिं **कृत्वा** नाम लिखत । (**त्रीणि एव** ) 3

१. को + अपि २. नै + अकः ३. मनु + अन्तरम् ४. इह + एव

**18. वाक्ये योजयत । (त्रीणि एव )** 3

१. क्रीडितुम् २. इदानीम् ३. दृष्ट्वा ४. गच्छ

**19. एतेषां धातु-लकार-पुरुष-वचनानि लिखत ।** ( त्रयाणामेव ) 3

१. लभन्ते २. कुरु ३. अवदन् ४. प्रायच्छत्

**20. सुबन्तानाम् अन्तं, लिङ्गं, विभक्तिं, वचनं च लिखत ।** ( त्रयाणामेव ) 3

1. हरौ 2. मातरः 3. अमुया 4. मातॄणाम्

**21. क्रियापदानां लकार-पुरुष-वचनानि लिखत ।** ( त्रयाणामेव ) 3

१. आसम् २. करवाणि ३. हन्ति ४. अभिलषसि

**22. इतरवचनद्वयं लिखत ।** 3

१. ......., ........., धातुषु २. मतिम् ........., .............

३. ......., ........., शम्भुभिः

**23. कर्तृपदं कर्मपदं क्रियापदं च पृथक् कृत्वा लिखत।** 2x1½=3

१. न जाने अहं वचनं तव ।

२. भारतीयाः वयं वृक्षानपि देवभावनया पश्यामः ।

**24. सोदाहरणं कन्नडभाषया आङ्ग्लभाषया वा विवृणुत। ( द्वावेव )** 4

१. त्त्वा प्रत्ययः २. पूर्वरूपसन्धिः ३. उपसर्गः

**25. कर्णाटकभाषया आङ्ग्लभाषया वा अनुवदत।** 4

१. वत्साः त्वदर्थं प्रभूततरं फेनम् उद्गिरन्ति ।

२. कठिनं तपः चरितुं नायं कालः तव ।

३. पक्षपातं कदापि मा कुरु ।

३. नदीम् उभयतः अनेके ग्रामाः सन्ति ।

**26. संस्कृतभाषया अनुवदत।** 4

1. Boys are playing in the playground in the evening.

   ಹುಡುಗರು ಕ್ರೀಡಾಂಗಣದಲ್ಲಿ ಸಾಯಂಕಾಲ ಆಡುತ್ತಿದ್ದಾರೆ.

2. There is a park near my house.

   ನನ್ನ ಮನೆಯ ಹತ್ತಿರ ಉದ್ಯಾನವಿದೆ.

3. A talented student studies in a famous school.

   ಬುದ್ಧಿವಂತ ಹುಡುಗನು ಪ್ರಸಿದ್ಧ ಶಾಲೆಯಲ್ಲಿ ಓದುತ್ತಿದ್ದಾನೆ.

4. The Himalaya mountain is to the north of India.

   ಹಿಮಾಲಯವು ಭಾರತದ ಉತ್ತರ ದಿಕ್ಕಿನಲ್ಲಿದೆ.

--------------------